आश्रित्य ब्रह्मविद्यादिसंज्ञामभ्येति शाश्वतः ॥
वेदैः स वेद्यः स तु वेदमूर्त्ति-
रमूर्त्ति-रात्योऽखिलविश्वमूर्त्तिः ।
विश्वाश्रयं ज्योतिरवेद्यवर्त्मा
धर्म्मावदातः परमः परेभ्यः ॥”
इति श्रीमार्कण्डेयपुराणे सूर्य्यमाहात्म्ये सूर्य्योत्पत्तिनामाध्यायः ॥ * ॥ अन्यच्च ।
“अष्टाविंशे पुनः प्राप्ते ह्यस्मिन् वै द्वापरे द्विजाः ।
पराशरसुतो व्यासः कृष्णद्वैपायनोऽभवत् ॥
स एव सर्व्ववेदानां पुराणानां प्रदर्शकः ।
पाराशर्य्यो महायोगी कृष्णद्वैपायनो हरिः ॥
आराध्य देवमीशानं दृष्ट्वा साम्बं त्रिलोचनम् ।
तत्प्रसादादसौ व्यासो वेदानामभवत् प्रभुः ॥
अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान् ।
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च ॥
पैलं तेषां चतुर्थञ्च पञ्चमं मां महामुनिः ।
ऋग्वेदश्रावकं पैलं प्रजग्राह महामुनिः ॥
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च ।
जैमिनिं सामवेदस्य श्रावकं सोऽन्वपद्यत ॥
तथैवाथर्व्ववेदस्य सुमन्तुमृषिसत्तमम् ।
इतिहासपुराणानि प्रवक्तुं मामयोजयत् ॥
एक आसीद्यजुर्व्वेदस्तञ्चतुर्द्धा व्यकल्पयत् ।
चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
आध्वर्य्यवं यजुर्भिः स्यादृग्भिर्होत्रं द्विजोत्तमाः ।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्व्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्व्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्व्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च विभेदतः ।
अथर्व्वाणमथो वेदं बिभेद नवकेन तु ॥
भेदैरष्टादशैर्व्यासः पुराणं कृतवान् प्रभुः ।
सोऽयमेकश्चतुष्पादो वेदः पूर्व्वं पुरातनात् ॥
ओंकारो ब्रह्मणो जातः स दोषविशोधनः ।
वेदवेद्यो हि भगवान् वासुदेवः सनातनः ॥
स गीयते परो देवो यो वेदैनं स वेदवित् ।
एतत् परतरं ब्रह्मज्योतिरानन्दमुत्तमम् ॥
वेदवाक्योदितं तत्त्वं वासुदेवं परं पदम् ।
वेदवेद्यमिदं वेत्ति वेदं वेदपरो मुनिः ॥
अवेदं परमं वेत्ति वेदनिष्ठः सदेश्वरः ।
स एव वेदो वेद्यश्च तमेवाश्रित्य मुच्यते ॥
इत्येतदक्षरं वेद्यमोङ्कारं वेदमव्ययम् ।
अवेदञ्च विजानाति पाराशर्य्यो महामुनिः ॥”
इति कौर्म्मे ४९ अध्यायः ॥ * ॥
वेदाध्ययनपाठं यथा,—
व्यास उवाच ।
“एवं दण्डादिभिर्युक्तः शौचाचारसमन्वितः ।
आहूतोऽध्ययनं कुर्य्याद्वीक्षमाणो गुरोर्मुखम् ॥
नित्यमुद्यतपाणिः स्यात् सन्ध्याचारः सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत् ।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥
नीचं शय्यासनं चास्य सर्व्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥
नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम् ॥
गुरोर्यत्र परीवादो निन्दा चापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
न चैवास्योत्तरं ब्रूयात् स्थिते नासीत सन्निधौ ॥
उदकुम्भं कुशान् पुष्पं समिधोऽस्याहरेत् सदा ।
मार्ज्जनं लेपनं नित्यमङ्गानां वै समाचरेत् ॥
नास्य निर्म्माल्यशयनं पादुकोपानहावपि ।
नाक्रामेदासनञ्चास्य छायादीन् वै कदाचन ॥
साधयेद्दन्तकाष्ठादीन् लब्धञ्चास्मै निवेदयेत् ।
अनापृच्छ्य न गन्तव्यं भवेत् प्रियहिते रतः ॥
न पादौ धावयेदस्य सन्निधाने कदाचन ।
जृम्भितं हसितञ्चैव कण्ठप्रावरणं तथा ॥
वर्ज्जयेत् सन्निधौ नित्यमवस्फोटनमेव च ।
यथाकालमधीयीत यावन्न विमना गुरुः ॥
आसीताधो गुरोर्द्दर्भे फलके वा समाहितः ।
आसने शयने याने नैव तिष्ठेत् कथञ्चन ॥
धावन्तमनुधावेत्तं गच्छन्तमनुगच्छति ।
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ॥
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ।
जितेन्द्रियः स्यात् सततं वश्यात्माक्रोधनः शुचिः ॥
प्रयुञ्जीत सदा वाचं मधुरां हितकारिणीम् ।
गन्धं माल्यं रसं कन्यां शुक्तं प्राणिविहिंसनम् ॥
अभ्यङ्गञ्चाञ्जनोपानच्छत्रधारणमेव च ।
कामं लोभं भयं निद्रां गीतं वादित्रनृत्यकम् ॥
आतर्ज्जनं परीवादं स्त्रीप्रेक्षालम्भनं तथा ।
परोपघातपैशुन्यं प्रयत्नेन विवर्ज्जयेत् ॥
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ।
आहरेद्यावदर्थानि भैक्षञ्चाहारमाचरेत् ॥
कृतञ्च लवणं सर्व्वं वर्ज्यं पर्य्युषितञ्च यत् ।
अनृत्यदर्शी सततं भवेद्गीतादिनिस्पृहः ॥
नादित्यं वै समीक्षेत नाचरेद्दन्तधावनम् ।
एकान्तमशुचिस्त्रीभिः शूद्रान्त्यैरभिभाषणम् ॥
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत न कामतः ।
मलापकर्षणं स्नानं नाचरेद्धि कथञ्चन ॥
न कुर्य्यान्मानसं विप्र गुरोस्त्यागे कथञ्चन ।
मोहाद्वा यदि वा लोभात्त्यक्तेन पतितो भवेत् ॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तन्न द्रुह्येत् कदाचन ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य मनुस्त्यागं समब्रवीत् ॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चाविसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥
विद्यागुरुष्वेतदेव नित्यवृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु चाधर्म्माद्धितञ्चोपदिशत्स्वपि ।
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्रेषु दारेषु गुरोश्चैव स्वबन्धुषु ॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥
उत्सादनं वा गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्य्याद्गुरुपुत्रस्य पादयोः शौचमेव च ॥
गुरुवत् प्रतिपूज्यास्तु सवर्णा गुरवस्तथा ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥
गुरुपत्नी तु युवती नाभिवाद्येह पादयोः ।
कुर्व्वीत वन्दनं भूमावसावहमिति च ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा ;
प्रपूज्या गुरुपत्नी च समास्ता गुरुभार्य्यया ॥
भ्रातृभार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि ।
विप्रस्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥
एवमाचारसम्पन्नमात्मवन्तमदाम्भिकम् ।
वेदमध्यापयेद्धर्म्मं पुराणाङ्गानि नित्यशः ॥
तथा चिरोषिते शिष्ये गुरुर्ज्ञानमनिर्द्दिशन् ।
हरते दुष्कृतं तस्य शिष्यस्यैव ततो गुरुः ॥
आचार्य्यपुत्रः शुश्रूषुर्ज्ञानदो धार्म्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्म्मतः ॥
कृतज्ञश्च तथाद्रोही मेधावी शुभकृन्नरः ।
आप्तः प्रियोऽथ विधिवत् षडध्याप्या द्विजातयः ।
एतेषु ब्रह्मणो दानमन्यत्र तु यथोदितात् ॥” * ॥
वेदाध्ययनविधिर्यथा,—
“आचम्य संयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्षमाणो गुरोर्मुखम् ॥
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ।
प्राक्कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥
कुर्य्यादध्यापनं नित्यं स ब्रह्मादीनि पूर्व्वतः ।
सर्व्वेषामेव भूतानां वेदश्चक्षुः सनातनः ॥
अधीतानध्ययन्नित्यं ब्राह्मण्याद्धीयतेऽन्यथा ।
अधीयीत ऋचो नित्यं क्षीराहुत्या सदैवताः ॥
प्रीणाति तर्पयन्नेनं कामैस्तृप्ताः सदैवताः ।
यजूंष्यधीते नियतं दध्ना प्रीणाति देवताः ॥
सामान्यधीते प्रीणाति घृताहुतिभिरन्वहम् ।
अथर्व्वाङ्गिरसो नित्यं मध्वा प्रीणाति देवताः ॥
धर्म्मार्थञ्च पुराणानि मांसैस्तर्पयते सुरान् ।
अपां समीपे प्रयतो नैत्यिकं विधिमाश्रितः ॥
गायत्रीमप्यधीयीत गत्वारण्यं समाहितः ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ॥
गायत्रीं वै जपेन्नित्यं जपयज्ञः प्रकीर्त्तितः ॥
गायत्रीञ्चैव वेदांश्च तुलयातोलयत् प्रभुः ।
एकतश्चतुरो वेदान् गायत्रीञ्च तथैकतः ॥
ओंकारमादितः कृत्वा व्याहृतीस्तदनन्तरम् ।
ततोऽधीयीत सावित्रीमेकाग्रः श्रद्धयान्वितः ॥
पुराकल्पे समुत्पन्ना भूर्भुवःस्वःसनातनाः ।